শ্রীঃ
শ্রীমতে রামানুজায নমঃ
শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীরামসৎকৱি প্রণীতম্

# ॥ শ্রীনৃসিংহস্তোত্রম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রীনৃসিংহস্তোত্রম্ ॥

শ্রীরমাকুচাগ্রভাসিকুঙ্কুমাঙ্কিতোরসং
তাপনাঙ্ঘ্রিসারসং সদাদযাসুধারসম্।
কুন্দশুভ্রশারদারৱিন্দচন্দ্রসুন্দরং
সিংহশৈলমন্দিরং নৃসিংহদেৱমাশ্রযে ॥ **1** ॥

পাপপাশমোচনং ৱিরোচনেন্দুলোচনং
ফাললোচনাদিদেৱসন্নুতং মহোন্নতম্।
শেষতল্পশাযিনং মনোরথপ্রদাযিনং
সিংহশৈলমন্দিরং নৃসিংহদেৱমাশ্রযে ॥ **2** ॥

সঞ্চরস্সটাজটাভিরুন্নমেঘমণ্ডলং
ভৈরৱারৱাটহাসভেদিদামিহোদরম্।
দীনলোকসাদরং ধরাভরং জটাধরং
সিংহশৈলমন্দিরং নৃসিংহদেৱমাশ্রযে ॥ **3** ॥

শাকিনীপিশাচিঘোরঢাকিনীভযঙ্করং
ব্রহ্মরাক্ষসৱ্যথা ক্ষযঙ্করং শিৱঙ্করম্।
দেৱতাসুহৃত্তমং দিৱাকরং সুধাকরং
সিংহশৈলমন্দিরং নৃসিংহদেৱমাশ্রযে ॥ **4** ॥

মৎস্যকূর্মক্রোডনারসিংহৱামনাকৃতিং
ভার্গৱং রঘূদ্ৱহং প্রলম্ভগর্পুরাপহম্।
বুদ্ধকল্কিৱিগ্রহং জগদ্বিরোধিনিগ্রহং
সিংহশৈলমন্দিরং নৃসিংহদেৱমাশ্রযে ॥ **5** ॥

ধারুণী ৱধূমণী গৃহীতপাদপল্লৱং
    নন্দগোষ্ঠ্রৱল্লৱীসতীমনোজ্ঞৱল্লভম্।
মাযিনাং ৱিশারদং ভৱাম্বুরাশিপারদং
    সিংহশৈলমন্দিরং নৃসিংহদেৱমাশ্রযে॥ **6**॥

মোহতাপহারিণং গদারথাঙ্গধারিণং
    শ্রীমনোৱিহারিণং ৱিদেহজোর্নিৱারিণম্।
দানৱেন্দ্রৱৈরিণং তপোধনেষ্টকারিণং
    সিংহশৈলমন্দিরং নৃসিংহদেৱমাশ্রযে॥ **7**॥

রামসৎকৱিপ্রণীতমেতদষ্টকা শিৱং
    দেৱসারসঙ্গ্রহং মহোগ্রপাতকান্তকম্।
জল্পিতাং নিরন্তরং সমস্তকামপূরকং
    সিংহশৈলমন্দিরং নৃসিংহদেৱমাশ্রযে॥ **8**॥

॥ ইতি শ্রীনৃসিংহস্তোত্রং সমাপ্তম্॥